हिमसंस्कृतवार्ताः
दैनिकं ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-180 | 1 | अप्रैल 29, 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
अद्य कालयुक्तः वि.सं. २०८२,
कलियुगाब्धः ५१२६ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणः वैशाखशुक्लद्वितीया
वैशाख 16 प्रविष्टांशः मङ्गलमयः भवेत्

2 हिमाचलम्- मुख्यमंत्रिना ई-कल्याण-(पोर्टलस्य) द्वारस्य उद्घाटनम् कृतम्, पात्रावेदकाः सञ्चालमार्गेण आवेदनं कर्तुं शक्नुवन्ति

3 देशहिताय सर्वे एकीकृताः, पाकिस्तानाय पाठं पाठयितुमस्ति आवश्यकता- विक्रमादित्यसिंहः

4 भारतस्य गुरुतमं बौद्धिक-सामरिक-वैफल्यम् अस्ति शत्रुबोध-शून्यता

## कनाडादेशे निर्वाचनप्रक्रिया प्रारब्धा



हिमसंस्कृतवार्ताः - कनाडादेशे राष्ट्रव्यापिनः मतदानकेन्द्राणि उद्घाटितानि, मतदातारः त्रिचत्वारिंशदधिक-त्रिशत-संसत्सदस्यानां चयनं करिष्यन्ति। देशस्य अग्रिमः प्रधानमन्त्री को भविष्यति इति निर्धारयितुं मतदानं भवति। बहुमताय कस्यचिदपि दलस्य कृते द्विसप्तत्यधिक्क-शतासनानां आवश्यकता भवति ।

## भारतेन फ्रांस्-देशेन सह षड्विंशति-सङ्ख्यकानां राफेल् इत्येतेषां योद्धविमानानां क्रयणार्थं रक्षासन्धिपत्रम् हस्ताक्षरितम्



हिमसंस्कृतवार्ताः - भारतेन फ्रांस्-देशेन सह षड्विंशति-सङ्ख्यकानां राफेल् इत्येतेषां योद्धविमानानां क्रयणार्थं रक्षासन्धिपत्रम् हस्ताक्षरितम् । रक्षामन्त्रालयस्य, फ्रेञ्च सर्वकारस्य च अधिकारिणाम् उपस्थितौ नवदेहल्याम् एतस्मिन् अन्तासर्वकारीय सन्धिपत्रे रक्षामन्त्रिणा राजनाथसिंहेन फ्रान्सदेशस्य च सशस्त्रबलमन्त्रिणा सेबेस्टियन-लेकॉर्नू इत्यनेन हस्ताक्षरं कृतम् । षड्विंशतिः राफेल-मरीन् जेट्- इत्येतेषु विमानेषु द्वाविंशतिः एकासनयुक्तानि, चत्वारि च द्वि-आसनयुक्तानि च भविष्यन्ति, एतानि भारतीय नौसेनायाः आवश्यकतानुगुणानि परिकल्पितानि निर्मितानि च भविष्यन्ति। राफ़ेल् मरीन् जेट्स् इत्यस्य समावेशनेन नौसेनायाः शक्तिः बहुगुणिता वर्धिता तथा एतानि योद्धविमानानि आई. एन्. एस् विक्रमादित्य, आई. एन्. एस् विक्रान्त् इत्यादिषु विमानवाहकेषु नियोजितानि भविष्यन्ति। राफ़ेल् इति विमानम् उन्नतशस्त्रव्यवस्थया क्षिपण्या च सुसज्जितं भविष्यति ।

## सुभाषितम्

**बुधाग्रे न गुणान् ब्रूयात्,**
**साधु वेत्ति यतः स्वयम्।**
**मूर्खाग्रेऽपि च न ब्रूयाद्,**
**बुधप्रोक्तं न वेत्ति सः॥**

भावार्थः- कभी भी अपने गुण किसी के सामने स्वयं नहीं प्रकट करने चाहिए क्योंकि किसी बुद्धिमान के सामने गुणों को कहने की आवश्यकता ही नहीं होती वह अपने स्वभाव से स्वयं जान लेते है, वैसे ही मूर्ख के सामने भी गुणों को नहीं कहना चाहिए क्योंकि कहने पर भी वे नहीं समझेंगे।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

## द्रौपदीमुर्मुः राष्ट्रपतिभवने प्रथमे नागरिकालङ्करण-समारोहे पद्म पुरस्कारान् प्रदत्तवती



हिमसंस्कृतवार्ताः - राष्ट्रपतिपदासीना द्रौपदीमुर्मुः राष्ट्रपतिभवने प्रथमे नागरिकालङ्करण-समारोहे पद्म पुरस्कारान् प्रददत्तवती । अस्मिन वर्षे गणतन्त्रदिवसस्य पूर्वसन्ध्यायां प्रशासनेन नवत्रिंशदधिकशत सङ्ख्यकाः पद्मपुरस्काराः समुद्घोषिताः। येषु सप्तपद्म-विभूषणानि, नवदश-पद्मभूषणानि, त्रयोदशाधिकशतानि पद्मश्री सम्मानानि सम्मिलितानि सन्ति।

## भारतस्य विरुद्धं दुष्प्रचारस्य प्रसारणेन पाकिस्ताने विकसिताः षोडश यू-ट्यूब्-वाहिन्यः भारतेन प्रतिबन्धिताः




हिमसंस्कृतवार्ताः - साम्प्रतिके एव पहलगाम आतङ्क्याक्रमणस्य पृष्ठभूमौ भारतस्य विरुद्धं दुष्प्रचारस्य प्रसारणेन, डॉन न्यूज़, समा-टी.वी. आर्य न्यूज़, जियो-न्यूज इत्यादयः पाकिस्ताने विकसिताः षोडश यू-ट्यूब्-वाहिन्यः भारतेन प्रतिबन्धिताः। एताः यू-ट्यूब्-वाहिन्यः भारतस्य, तस्य सेनायाः, सुरक्षाभिकरणानां च विरुद्धं उद्दीपक-साम्प्रदायिक-संवेदनशील-सामग्रीः, असत्य-भ्रामक कथनानि च प्रसारयन्ति इत्यस्मात् कारणात् प्रतिबन्धिताः सन्ति। प्रतिबन्धितेषु वाहिनिषु त्रिषष्टी-दशलक्षात् अधिकाः दर्शकाः सन्ति। पहलगाम आतंक्याक्रमणस्य विषये बी. बी. सी. इत्यस्य वार्तायाः विषये अपि प्रशासनेन आक्षेपः कृतः, तथा च भारतस्य बी. बी. सी. प्रमुखाय देशस्य प्रबल-भावनाः अपि सूचिताः । आतंकवादीनां नामकरणविषये बी. बी. सी. इत्यस्मै औपचारिकं पत्रम् अपि प्रेषितम् अस्ति। विदेशमन्त्रालयः बी. बी. सी. इत्यस्य वार्तालापस्य निरीक्षणं करिष्यति।

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## प्रधानमन्त्री नरेन्द्रमोदी रक्षामन्त्रिणा राजनाथसिंहेन सह नवदेहल्याः स्वनिवास-स्थाने पहलगाम आतङ्क्याक्रमणं निध्याय उपवेशनं कृतवान्



हिमसंस्कृतवार्ताः - प्रधानमन्त्री नरेन्द्रमोदी रक्षामन्त्रिणा राजनाथसिंहेन सह नवदेहल्याः स्वनिवासस्थाने उपवेशनं कृतवान्। प्रायः चत्वारिंशत् निमेषपर्यन्तं यावत् प्रचलितेऽस्मिन् उपवेशने पहलगाम आतङ्क्याक्रमणम् आलक्ष्य कार्याचरणेषु चर्चाभवत् ।

## आयुष्मान भारत-प्रधानमन्त्री-वय-वन्दना योजनां शुभारम्भितवन्तौ देहल्याः मुख्यमन्त्री रेखा गुप्ता, प्राकृतिक-इन्धन-मन्त्री हरदीपसिंहपुरी च



हिमसंस्कृतवार्ताः - प्राकृतिक-इन्धन-मन्त्री हरदीपसिंहपुरी तथा च देहल्याः मुख्यमन्त्री रेखा गुप्ताइत्येषा नवदेहल्यां त्यागराज-प्राङ्गणे आयुष्मान भारत-प्रधानमन्त्री-वय-वन्दना योजनां शुभारम्भितवन्तौ। उभाभ्यां लाभार्थिभ्यः वय-वन्दना-प्रपत्राणि अपि वितरितानि। कार्यक्रमं सम्बोधयन् श्रीपुरी निगदितवान् यत् राशि-रहित-सुविधा अस्याः उद्घाटितायाः योजनायाः साकारात्मिकी विशिष्टता वर्तते या हि अन्यासु कास्वपि स्वास्थ्ययोजनासु उपलब्धा न विद्यते । अत्रावसरे प्रवदन्ती देहल्याः मुख्यमन्त्री रेखागुप्ता प्रत्यपादयत् यत् दिल्ली-प्रशासनम् अनया योजनया राष्ट्रिय-राजधान्याः वरिष्ठनागरिकान् सम्मानयति।

# हिमाचलम्- मुख्यमंत्रिना ई-कल्याण-(पोर्टलस्य) द्वारस्य उद्घाटनम् कृतम्, पात्रावेदकाः सञ्चालमार्गेण आवेदनं कर्तुं शक्नुवन्ति



**हिमसंस्कृतवार्ताः - डॉ पद्मनाभः।** शिमला । मुख्यमंत्री सुखविन्द्रसिंहसुक्खुः सोमवासरे अनुसूचितजाति-अन्यपृष्ठवर्ग-अल्पसंख्यक-विशेषरूपेण सक्षमजनसशक्तिकरणविभागस्य (ईसोमसा) ई-कल्याण-पटलस्य शुभारम्भम् अकरोत्। एतद् पटलं "हिमपरिवार" इत्यस्य पटलस्य अन्तर्गतं निर्मितम्। अस्य पटलस्य माध्यमेन हिमाचलप्रदेशस्य सर्वे पात्राः नागरिकाः ईसोमसा-निदेशालयेन चालयमानाः पेंशन-योजनाः लाभरूपेण स्वीकर्तुं जालपृष्ठे (ऑनलाइन) आवेदनं कर्तुं शक्नुवन्ति।

अस्मिन् प्रसंगे मुख्यमंत्रीवर्येण उक्तम् यत् प्रदेशवासिभ्यः सामाजिकसुरक्षापेंशनं प्रदातुं राज्यसर्वकारस्य सर्वोच्चप्राथमिकता अस्ति।ते अवदन् यत् प्रदेशे सामाजिकसुरक्षायै वर्तमानकाले अष्ट पेंशन-योजनाः प्रचलन्ति। गतं वित्तवर्षे एतासु योजनासु १४१० कोटिरूप्यकाणि व्ययितानि, येन ८,२४,९२८ जनाः लाभम् अलभन्। अस्मिन् वित्तवर्षे च सामाजिकसुरक्षापेंशनयोजनायाम् ३७ सहस्रं नवीनलाभार्थिनः सम्मिलिताः भविष्यन्ति, यन्निमित्तं ६७ कोटिरूप्यकाणि अतिरिक्तरूपेण व्ययिष्यन्ते।अवगतं च कृतम् यत् ई-कल्याण-पटलम् "हिमभूमि", "हिमपरिवार", "आधार", च "पीडीएस राशनकार्ड" डेटाबेस इत्येतैः सह एकीकृतः अस्ति। आवेदकः स्वयम् अथवा लोकमित्रकेन्द्रस्य साहाय्येन https://himparivar.hp.gov.in/ekalyan इत्यत्र गत्वा आवेदनं कर्तुं शक्नोति। आवेदकः प्रमाणपत्रस्य निर्माणार्थं तथा आवेदनार्थं कार्यालयं प्रति न गन्तव्यम्। त्रुटीणाम्, सत्यापनस्य, स्वीकृतेः च सूचनाः अपि डिजिटलमाध्यमेन गृह एव प्राप्ताः भविष्यन्ति।अस्मिन् अवसरे डिजिटलप्रौद्योगिकी-शासनविभागस्य निदेशकः डॉ. निपुणजिंदलवर्यः विस्तृतं पटलप्रस्तुतिम् अकरोत्। अस्मिन् प्रसंगे सामाजिकन्याय-अधिकारितामन्त्री डॉ. (कर्नलः) धनीरामशांडिलवर्यः, उद्योगमन्त्री हर्षवर्धनचौहानः, लोकनिर्माणमन्त्री विक्रमादित्यसिंहः, राज्ययोजनाबोर्डस्य उपाध्यक्षः भवानीसिंहपठानिया, विधायकः संजय अवस्थीवर्यः, सचिवः आशीष सिंहमारः च राखिलकाहलों च, निदेशकः ईसोमसा किरणभड़ाना, विशेषसचिवः मुख्यमंत्री डॉ. हरीशगज्जूः, अतिरिक्तनिदेशकः राजीवशर्मा च अपि उपस्थिताः आसन्।

## मुख्यमन्त्रिणा एफआरएदिनाङ्क-पत्रिकामयाः विमोचनम् कृतम्

मुख्यमंत्री सुखविन्द्रसिंहसुक्खूवर्यः शिमलानगरे वर्षे २०२५-२६ अभिमुखीकृतं एफआरए दिनाङ्कपत्रिकायाः विमोचनं कृतवान्। अस्मिन् दिनाङ्कपत्रे वनाधिकार-अधिनियमस्य अन्तर्गतं वर्षपर्यन्तं सम्पादनीयानां विविधानां क्रियाणां विवरणम् अस्ति।अस्मिन् अवसरे मुख्यमंत्री अवदन् यत् एषा दिनाङ्कपत्रिका राजस्व अधिकारिणां कृते मार्गदर्शिकायाः कार्यं करिष्यति। प्रत्येकक्रियायाः कृते व्यापककार्यक्रमस्य विवरणम् अपि अस्मिन् निर्दिष्टम् अस्ति। अस्य माध्यमेन प्रदेशे एफआरए सम्बन्धितकार्याणां उत्तमं क्रियान्वयनम् निगमनञ्च सुनिश्चितं भविष्यति।अस्मिन् अवसरे राजस्वमन्त्री जगत्सिंहनेगीवर्यः, विधायकः हरीशजनारथवर्यः, अतिरिक्तमुख्यसचिवः ओंकारचन्द्रशर्मा च अपि उपस्थिताः आसन्।

# नियुक्तिप्रक्रियां स्थगयित्वा युवभिः सह अन्यायं करोति सर्वकारः – जयरामठाकुरः

**हिमसंस्कृतवार्ताः - शिमला।** विपक्षनेता जयरामठाकुरः अवदत् यत् सर्वकारेण तत्काले प्रभावेण अनुबन्धनियुक्तिनिषेधः कृतः। परन्तु युनां नियुक्तिः कथं भविष्यति इति विषये किमपि न कथितम्। युनः निरवकाशाः स्थापयितुं सर्वकारस्य षड्यंत्रम् अस्ति एतत्। प्रथममन्त्रिमण्डले एकलक्षं सर्वकारीयकार्यस्य प्रतिज्ञां दत्त्वा सत्तां प्राप्तः सर्वकारः प्रतिदिनं कार्याणि समाप्तुं रणनीतिं स्वीकरोति। प्रतिदिनं सर्वकारः कार्याणि न प्रदातुं, जनान् निष्कासयितुं, वेतनं न्यूनीकर्तुं, पदोन्नतिं स्थगयितुं कारणानि अन्विष्यते। गतवर्षस्य अक्टोबरमासे वर्षद्वयं यावत् रिक्तस्थानानि सर्वकारेण समाप्तानि। अस्य कृते सर्वकारेण बहूनि कारणानि दत्तानि किन्तु किमपि न अभवत् । तेषु पदेषु किमपि न अभवत्। अद्यत्वे अपि युनः कार्याणि अन्विषयन्ति, आदेशं आनयन् सर्वकारेण कस्यापि प्रकारस्य कार्यस्य सम्भावना समाप्ता। विपक्षनेता अवदत् यत् एप्रिल-मासस्य २५ दिनाङ्के पत्रं निर्गत्य राज्ये सर्वकारेण सर्वप्रकारस्य अनुबन्ध-आधारित-नियुक्तौ प्रतिबन्धः कृतः। अग्रे चयनं कथं भविष्यति इति सर्वकारेण स्पष्टं न कृतम्? युनः कथं जीविकां प्राप्नुयुः ? किं सर्वकारः एतस्याः अधिसूचनायाः माध्यमेन प्रतिबन्धं कृत्वा युनां कृते कार्याणि न दातुम् इच्छति? किं सर्वकारः युनां जीविकां न दत्त्वा गतद्वयवर्षे इव शेषं कार्यकालं व्यतीतुं इच्छति? एवं प्रकारेण सर्वकारः अधिसूचनाम् आनयति, जनानां कृते प्रदत्तानां सुविधानां स्थगनं करोति, ततः पश्चात् न पश्यति। एषा सुखस्य शासनस्य पुरातनपद्धतिः। अद्य अनुबन्धनियुक्तिः स्थगयित्वा सर्वकारः अग्रिमपदं किं किं करिष्यति इति स्पष्टता नास्ति। चतुर्दिनानि व्यतीतानि अपि अस्मिन् विषये सर्वकारेण किमपि स्पष्टीकरणं न कृतम्, राज्ये सर्वत्र युनः प्रतीक्षन्ते। सुखस्य सर्वकारः दिशः दृष्ट्या च दूरम् अस्ति।

# राज्यसर्वकारस्य विरुद्धं

## अपमानजनकटिप्पणीं कृत्वा चत्वारः अपि प्राथमिकशिक्षकाः निलम्बिताः

हिमसंस्कृतवार्ताः - शिमला। विद्यालयशिक्षानिदेशालयेन चत्वारः अपि प्राथमिकशिक्षकाः सर्वकारस्य विरुद्धं अपमानजनकाः टिप्पण्याः कृताः इति कारणेन निलम्बिताः। शिक्षानिदेशकः आशीषः कोहली द्वारा प्रसारिते कार्यालयादेशे केन्द्रीयमुख्यशिक्षकः (सीएचटी) अनिलकुमारः, मुख्यशिक्षिका (एचटी) सुनीता शर्मा एवं जेबीटीशिक्षकः प्रमोदः चौहानः एवं हेमराजः च निलंबिताः अस्ति। काङ्ड़ामण्डलस्य नगरोटा बगवां इत्यत्र नियुक्तः केन्द्रीयमुख्यशिक्षकः अनिलकुमारः निलम्बनकालस्य कालखण्डे प्रखण्डकार्यालये इन्दौरा इत्यत्र प्रतिवेदनं दातुं कथितः, शिमला मण्डलस्य टिक्कर इत्यत्र नियुक्तः जेबीटीशिक्षकः प्रमोदः चौहानः कुपवी विद्यालये, ऊनाजनपदस्य गगरेट इत्यत्र नियुक्ता केन्द्रीयमुख्यशिक्षिका सुनीता शर्मा इत्यस्यै बंगाणा विद्यालये तथा च मण्डीजनपदस्य बगस्याड़े नियुक्तः जेबीटीशिक्षकः हेमराजः च इत्यस्मै धर्मपुर विद्यालये उपस्थितिं दातुं कथितम्। गतशनिवासरे अपमानजनकटिप्पणीं कर्तुं चत्वारः शिक्षकाः,नेरवायां विद्यालयस्य बन्दीकरणस्य कारणेन द्वौ शिक्षकौ च निलम्बिताः। अधुना यावत् निलम्बितशिक्षकाणां संख्या दशः अभवत्।

# त्रिसहस्राणि वाहनानि ई-वाहनेषु परिवर्तितानि भविष्यन्ति, बसस्थानकेषु चार्जिंगस्थानकानि स्थापितानि भविष्यन्ति




**हिमसंस्कृतवार्ताः - सोलनम्।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् राज्यसर्वकारः हिमाचलं हरित ऊर्जाराज्यं कर्तुं दृढतया कार्यं कुर्वन् अस्ति। अस्मिन् वर्षे ३००० पेट्रोल-डीजल-वाहनानां ई-वाहनेषु परिवर्तनस्य लक्ष्यं सर्वकारेण निर्धारितम् अस्ति । ई-टैक्सी योजनायाः अन्तर्गतं सर्वकारेण एतावता ५० ई-टैक्सी-यानानि सर्वकारीयविभागेषु संलग्नानि सन्ति, १० मे-मासात् पूर्वं ५० अधिकानि ई-टैक्सी-यानानि अनुमोदितानि भविष्यन्ति । सर्वकारेण युनां कृते ६८० कोटिरूप्यकाणां राजीवगान्धी स्वरोजगारप्रारम्भयोजना प्रारब्धा अस्ति ई-टैक्सी-क्रयणे राज्यसर्वकारः ५० प्रतिशतं अनुदानं ददाति । सोलनस्य कसौलीविधानसभाक्षेत्रस्य अन्तर्गतगान्धीग्रामे सोमवासरे मुख्यातिथिरूपेण मुख्यमन्त्री राष्ट्रियट्रक-बस-सम्मेलने भागं गृहीतवान्।मुख्यमन्त्री उक्तवान् यत् पर्यटकसहितस्य राज्यस्य जनानां कृते स्वच्छं हरितं च परिवहनं प्रदातुं सर्वकारः क्रमेण डीजलबसयानानां स्थाने ई-बस-यानानि स्थापयति। एचआरटीसी ४१२ कोटिरूप्यकाणां व्ययेन २९७ विद्युत्बसयानानां क्रयणार्थं निविदा कृता अस्ति। बसस्थानकेषु १२४ कोटिरूप्यकाणां व्ययेन चार्जिंग्-स्थानकानि अपि स्थापितानि सन्ति । एतेषां ई-बस-क्रयणस्य अतिरिक्तं २०२५-२६ वित्तीयवर्षे ५०० अधिकानि ई-बस-यानानि क्रियन्ते । राज्ये षट् हरितवीथयः स्थापिताः सन्ति। एतासु वीथिषु ४१ अतिरिक्तानि चार्जिंगस्थानकानि स्थापयितुं सर्वकारः गच्छति। वर्तमानसर्वकारेण ई-वाणिज्यिकवाहनानां पञ्जीकरणे मार्गकरस्य शतप्रतिशतम्, विशेषमार्गकरस्य ५०% अपकर्षं च प्रदत्तम् अस्ति । पर्यावरणस्य रक्षणस्य उद्देश्यं कृत्वा राज्ये प्रचलितानां सर्वेषां पेट्रोल-डीजल-चालितानाम् आटोरिक्शानां स्थाने केवलं ई-आटोरिक्शाः एव स्थापिताः सन्ति।

# देशहिताय सर्वे एकीकृताः , पाकिस्तानाय पाठं पाठयितुमस्ति आवश्यकता- विक्रमादित्यसिंहः



**हिमसंस्कृतवार्ताः - शिमला।** लोकनिर्माणमन्त्री विक्रमादित्यसिंहः पहलगामस्य आतङ्कवादीप्रहारस्य विषये किञ्चित् महत् उक्तवान्। सः अवदत् यत् अस्मिन् दुःखदकालै काङ्ग्रेसपक्षः केन्द्रसर्वकारेण सह तिष्ठति। देशस्य १४० कोटिजनाः एकीकृताः सन्ति । सः अवदत् यत् इदानीं समयः समाप्तः अस्ति, आतङ्कवादिनः विरुद्धं कठोरकार्याणि करणीयानि। इति सर्वस्य देशस्य स्वरः। पाकिस्तानं कार्ये गृहीत्वा सः अवदत् यत् इदानीं पाकिस्तानं पाठं पाठयितुं समयः आगतः।पहलगाम आक्रमणस्य प्रतिशोधः अवश्यं करणीयम्। अस्मात् पूर्वमपि उड़ी, पुलवामा इत्यादिषु आक्रमणेषु पाकिस्तानस्य संलग्नता उजागरिता आसीत् । विक्रमादित्यसिंहः अपि स्मरणं कृतवान् यत् १९७१ तमे वर्षे तत्कालीनप्रधानमन्त्री इन्दिरागान्धी पाकिस्तानं द्विधा विभक्तवती । अद्यत्वेऽपि देशे अपि एतादृशी स्थितिः उत्पन्ना अस्ति । अस्माभिः एकीकृत्य निर्णयिकपदानि ग्रहीतुं आवश्यकम्। सः सिन्धुजलसन्धिः स्थगितस्य निर्णयस्य स्वागतं कृत्वा राष्ट्रहिताय काङ्ग्रेसः सर्वकारेण सह अस्ति इति अवदत्। विक्रमादित्यसिंहः अपि अवदत् यत् पहलगाम-आक्रमणानन्तरं काङ्ग्रेस-पक्षः सर्वान् कार्यक्रमान् स्थगितवान्। अस्मिन् सन्दर्भे सः भारतीयजनतापक्षम् अपि लक्ष्यं कृतवान् । सः अवदत् यत् यदा सम्पूर्णः देशः शोकग्रस्तः भवति तदा विपक्षनेता अन्ये च भाजपानेतारः सार्वजनिककार्यक्रमेषु नृत्यं च कुर्वन्ति। ते एतां संवेदनशीलतां अपि गृह्णीयुः।

# अदम्यनारीशक्तिप्रेरणा महारानी अहिल्याबाई




**हिमसंस्कृतवार्ताः- जगदीश डाभी।**

अहिल्याबाई होलकरस्य जन्मः 31 मई 1725 दिनाङ्के महाराष्ट्रराज्यस्य चौण्डीग्रामे अभवत्, लोकमातायाः 300तमे जन्मदिवसस्य अवसरे जिलाशिक्षाप्रशिक्षणसंस्थाने नीमचे आयोजितः समूहचर्चायां लोकमातायाः नेतृत्वस्य, प्रासंगिकतायाश्च प्रेरणादायकं व्याख्यानं दत्तम्। अशासकीयविद्यालयः संस्कारभारती विद्यामन्दिरस्य प्रबन्धिकां साक्षीभगिनीं पिता विपिनपुरोहितः अवदत् यत् साधारणकृषकस्य एकमात्रपुत्री अहिल्याबाई सरलम् आत्मीयं च जीवनं यापयति स्म। सामान्यशिक्षणसुविधानाम्, अभावेऽपि अहिल्याबाई इत्यस्य विवाहः १० वर्षे अल्पवयसि मालवानगरस्य होल्करवंशस्य संस्थापकः मल्हाररावहोल्करस्य पुत्रेण खण्डेरावेन सह अभवत्। सा स्वकर्तव्यप्रति समर्पणेन सर्वेषां हृदयम् अजयत्। तस्याः २९ वर्षीयायाः पतिः मृतः, १७६६ तमे वर्षे तस्य श्वशुरः मल्हाररावः अपि मृतः, अतः सा शासनस्य दायित्वं स्वीकृतवती, पश्चात् तस्य पुत्रः मलेरावः, पौत्रः नाथुः, जामाताफंसः, पुत्रीमुक्ता च अपि तं एकान्ते त्यक्तवन्तः। फलतः 'माता' स्वजीवनेन कुण्ठिता, परन्तु सा लोककल्याणार्थं संयमं कृतवती। जनानां राजमाता इति अपि प्रसिद्धा, सा इन्दौरनगरं लघुग्रामं समृद्धं विकसितं च महानगरं परिणामयितुं महतीं भूमिकां निर्वहति स्म। मार्गाणां स्थितिं सुदृढीकरणं, निर्धनानाम्, क्षुधार्तानां च भोजनं प्रदातुं, सा शिक्षायाः विषये अपि बलं दत्तवती। दरिद्राणां, दीनानां, असहाय्यानां च प्रति करुणादानपूर्णा च आसीत्। समाजसेवायाम् पूर्णतया समर्पिता महारानी अहिलियाबाई जीवने अनेकसमस्यानां सम्मुखीभूय यथा स्वस्य अदम्यस्त्रीशक्तिं प्रयुक्तवती तत् अत्यन्तं प्रशंसनीयम् अस्ति, अहिल्याबाई अस्माकं सर्वेषां कृते प्रेरणादायिनी अस्ति। कार्यक्रमस्य संचालनं गतिविधिप्रभारी दिग्विजयपालीवालेन कृतम्, प्राचार्या पुष्पांजलितिवारी महोदयायाः अध्यक्षीय उद्बोधनम् आसीत्, प्रशिक्षु अर्जुनः, भारतीशर्मा च आभारं प्रकटितवन्तौ, उपर्युक्तासूचना प्रचारप्रभारी दीपक टेलरः इत्यनेन दत्ता।

## जम्मू-कश्मीर-विधानसभायां विशेषसत्रम् आहूय पहलगामे दुरापादितस्य आतङ्क्याक्रमणस्य दृढतया निन्दां कुर्वत्या एकः प्रस्तावः पारितः



**हिमसंस्कृतवार्ताः** - जम्मू-कश्मीर-विधानसभया पहलगामे दुरापादितस्य आतङ्क्याक्रमणस्य दृढतया निन्दां कुर्वत्या एकः प्रस्तावः पारितः। जम्मू-कश्मीर-विधानसभया पहलगामे दुरापादितस्य आतङ्क्याक्रमणस्य दृढतया निन्दां कुर्वत्या एकः प्रस्तावः पारितः। प्रस्तावेऽस्मिन् आक्रमणं जघन्यं, बर्बरं, अमानवीयं चेति उक्तम्। होरात्रयं यावत् दीर्घकालिक-विमर्शानन्तरं सदनेन सर्वसम्मत्या एषः प्रस्तावः स्वीकृतः । प्रस्तावे उक्तं यत् एतादृशम् आतङ्क्याक्रमणं कश्मीर-लोकाचारस्य, संविधानस्य मूल्यानां, एकतायाः, शान्तेः, सौहार्दस्य च भावनायां प्रत्यक्षतया आक्रमणं करोति, गतसप्ताहे घटनायां मृतान् जनान् श्रद्धांजलिम् अर्पयितुं सदस्य द्विनिमेषात्मकं मौनधारणं कृतम्। समारब्धायाः विधानसभायाः विशिष्टे सत्रे उपमुख्यमन्त्रिणा सुरिंदरचौधरिणा एषः प्रस्तावः प्रस्तावितः। उपमुख्यमन्त्री उक्तवान् यत् पहलगामे निर्दोष-नागरिकाणाम् उपरि कृतस्य बर्बरामानवीय आक्रमणस्य विषये सदनेन गहनाघातः, पीडाः च प्रकटिताः। प्रस्तावम् उद्धृत्य श्रीचौधरी अवदत् यत्, "एतादृशानि आतङ्क्याक्रमणानि कश्मीरलोकाचारेषु, अस्माकं संविधाने निहितेषु मूल्येषु, एकतायां, शान्तौ, सौहार्दपूर्णं भावनायां च प्रत्यक्षाक्रमणम् अस्ति, यद्धि चिरकालादेव जम्मू-कश्मीरस्य, अस्माकं राष्ट्रस्य च वैशिष्ट्यं वर्तते। विधानसभया घटनायाः एकदिनानन्तरं सुरक्षासम्बद्धमन्त्रिमण्डलसमितेः उपवेशनानन्तरं केन्द्रेण घोषितानां कूटनीतिकोपायानां समर्थनमपि कृतम्।

# दशदिवसीय- संस्कृतसम्भाषण- शिबिरकार्यशालायाः उद्घाटनं सञ्जातम्



**हिमसंस्कृतवार्ताः- अजयकुमार आर्यः, बठिंडा**

पञ्जाबराज्यस्य बठिण्डानगरे सन्त- सहारा- आयुर्वेदिक चिकित्सीय- महाविद्यालयस्य संस्कृतभारती पञ्जाबप्रान्तस्य च संयुक्ततत्त्वाधाने दशदिवसीय- संस्कृतसम्भाषण- कार्यशालायाः उद्घाटनं सञ्जातम्। उद्घाटनकार्यक्रमस्य शुभारम्भः दीपप्रज्ज्वालनेन दीपमन्त्रेण च अभवत्। छात्रैः धन्वन्तरिवन्दना अपि प्रस्तुता। अस्मिन् उद्घाटनसत्रे सन्त-सहारा- आयुर्वेदिक-महाविद्यालयस्य प्राचार्यः वैद्य रणजीत सोलंकरः उपस्थितः आसीत्। महाविद्यालयस्य प्राचार्यमहोदयेन स्वोद्बोधने उक्तं यत् आयुर्वेदस्य आधारः संस्कृतमेव अस्ति, आयुर्वेदः संस्कृतम् इव प्राचीनमस्ति। आयुर्वेदस्य भाषा संस्कृतमेव अस्ति। सर्वेषां कृते एषा कार्यशाला उपयोगिनी भविष्यति इति उक्त्वा बालकानां मार्गदर्शनं कृतम्। अस्यां कार्यशालायां विस्तारिका रजनी शिक्षिकारूपेण भविष्यति। ध्यातव्यमस्ति यत् आयुर्वेदिकमहाविद्यालयेषु संस्कृतशिक्षणार्थं पञ्जाब-आयुर्वेदिक-विश्वविद्यालयात् आदेशः अस्ति यत् प्रत्येकम् आयुर्वेदविद्यालये संस्कृत- सम्भाषणशिबिरं भवेदेव येन आयुर्वैदिकाः निजग्रन्थान् सम्यक्तया अध्येषीरन्।उद्घाटनेऽस्मिन् महाविद्यालयस्य-शिक्षकाः डॉ. लवनीश पुर्थी (उपप्रधानाचार्यः) डॉ. अपर्णा, डॉ. निधि चौधरी, डॉ. निधि अरोड़ा, डॉ. पलक, डॉ. साक्षी, डॉ. अमीन, डॉ. मीनाक्षी, डॉ. रवि अरोड़ा, डॉ. मनिंदर सिंह, डॉ. श्वेता, डॉ. भुवनेहा शर्मा, डॉ. रुचि शर्मा, डॉ. सजुज्य, डॉ. भावना उपस्थिताः आसन्। अस्यां कार्यशालायां शताधिक-छात्राः च भागं गृह्णन्तः सन्ति।

# गरुडपुराणान्तर्गतः
# प्रेतकल्पः



✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

भगवता श्रीव्यासदेवेन विरचितेषु अष्टादशपुराणेषु गरुडपुराणम् अन्यतमम्। अस्य पुराणस्य एकांशभूतः प्रेतकल्पः मनुष्यैः अवश्यं श्रवणीयः, ज्ञातव्यश्च। विशेषतः हिन्दूसनातनिभिः अयमंशः श्रूयमाणोऽस्तीति परम्परा। अत्र मृतकानाम् उद्धारार्थं करिष्यमाणानां कार्याणां वर्णनं प्राप्यते। मनुष्यः यादृशं शुभाशुभकर्म करोति तादृशं हि शुभाशुभफलम् अधिगच्छतीति सृष्टिनियमः। शुभकर्मणः फलं किम्, एवम् अशुभकर्मणः च फलं किमिति विषये अस्मिन् भागे अत्यन्तं सुन्दरतया वर्णितं प्राप्यते। चतुरशीतिलक्षयोनिषु मनुष्ययोनिः अन्तिमा। दुष्कर्मिभिः पापिभिः एतावत्यः दुःखोपेताः योनयः भुज्यन्ते, तदनन्तरं हि कथञ्चित् तैः देवदुर्लभं मनुष्यजन्म लभ्यते। यदि अस्मिन्नपि मनुष्यजन्मनि ते शुभकर्माणि नाचरेयुः तर्हि ते पुनः पूर्ववत् तानि एव चतुरशीतिलक्षजन्मानि प्रविशेयुः। अतः तेषां जन्ममरणरूपधारा न कदापि समाप्ततां गच्छेत्। तस्मात् तैः अनिवार्यत्वेन सदैव दुःखयातना हि सोढव्या भवति। यावत् मनुष्याणां परमात्मप्राप्तिः न सम्भवेत् तावत् तेषां दुःखान्निवृत्तिः अपि न कदापि सम्भवति। एतादृशं सर्वमपि तथ्यम् अस्मिन् प्रेतकल्पे उल्लिखितं प्राप्यते। अतः पुराणादिग्रन्थाः अस्माभिः सम्यक् प्रपठ्य मननीयाः, आचरणीयाः च स्वकल्याणाय, जनकल्याणाय चेति।

## "लौकिकन्यायकोशः"

## "अरण्यरोदनन्यायः“



अरण्ये रोदनम् इति न्यायस्य अभिप्रायः। अरण्ये कियदपि रोदनं कृतं चेदपि तत् व्यर्थम् एव। रोदनं प्रति कस्यापि ध्यानं गच्छेत् इत्ययं प्रश्न एव न उद्भवति। अतः सहानुभूतिः अप्राप्या भवति। अस्य न्यायस्य आधारेण व्यर्थक्रियाणां वर्णनं क्रियते।तुल्याः न्यायाः:- अन्धदर्पणन्यायः, ऊषरवृष्टिन्यायः इत्यादयः। धूर्तस्य सेवा कथं व्यर्था भवति इति बहुभिः उदाहरणैः कथितम्- अरण्यरुदितं कृतं शवशरीरमुद्वर्तितं स्थले कमलारोपणं सुचिरमूषरे वर्षितम्। श्वपुच्छमवनामितं बधिरकर्णजापः कृतः कृतान्तमुखमण्डना यद् अबुधो जनः सेवितः।। {पञ्चतन्त्रम् १-१५५}।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे/ महाराष्ट्रम्**

# भारतस्य गुरुतमं बौद्धिक-सामरिक-वैफल्यम् अस्ति
# शत्रुबोध-शून्यता

भारतस्य गुरुतमं बौद्धिक-सामरिक-वैफल्यम् अस्ति शत्रुबोध-शून्यता। केवलं समाजे न, अपितु राष्ट्रस्य अपि विविधेषु अङ्गेषु - राजनैतिकेषु वा सैन्येषु वा प्रशासनिकेषु वा शत्रुबोधः नास्ति। शत्रुं, शत्रोः मानस्कतां प्रयुक्तिं च बोधयितुम् अक्षमं भारतं शत्रुं निवारयितुं वा पराजेतुं वा न सज्जम्।चीनं वा बाङ्ग्लदेशः वा भारत-निवासि शत्रुप्रेमि-वृन्दं वा विस्मर्यतां, पाकिस्तान-सदृशः भारतं हिन्दुत्वं च द्विषन् शत्रुः अपि अपठितः अनवगतः। सार्वजनिक-रूपेण भारत-हिन्दु-द्वेष्टारं भारत-विभिबाजयिषुं पाकिस्तान-देशम् अपि अशत्रुं वा मित्रं वा भ्रातारं वा मन्यमानाः भारते सन्ति येषु प्रधान-मन्त्रि-मन्त्र-दातारः अपि विद्यन्ते इति चित्तप्रमाथि। स्वान् कश्मीर-विशेषज्ञान् मन्यामानाः भारत-सुरक्षा-उत्तरदायिनः अपि सन्ति ये "पाकिस्तानेन सह एव अग्रे गन्तव्यम्" इति घोषयित्वा अभिमानम् अनुभवन्ति। तेषु निराधारं दोषारोपणम् अन्यायः स्यात् किन्तु बुद्धिः अवश्यं सन्दिह्यताम्।

## पाकिस्तान-विषये भारतीयानाम् अवगमनम् अत्यल्पमेव

पाकिस्तान-विषये वा पाकिस्तानीयानां विषये भारतीये अवगमने गाढता नास्ति। इदम् अवगमनं बहुवारं केवलं निजानुभवानुसारेण, अगाढं च। बहुवारं निजानुभवाः राजनैतिकाः इव मताः अपि च निजसंबन्धाः हृद्याः सन्ति चेत् राजनैतिकसंबन्धाः अपि स्युः इति अतिकल्पना अस्ति।असाधुतरं यत् निजानुभवानुसारं पाकिस्तानीयानां गुणवत्तायां विश्वासं स्थापयित्वा पाकिस्तानेन शान्त्याः मैत्र्याः च कामनां कर्तुम्।ते वयं च सर्वे एकभाषिणः किल? नैव। ते वयं च समानप्रथाचाराः किल? नै। अस्मभ्यं सर्वेभ्यः एका एव शैली सङ्गीतस्य रोचते किल? नैव। सदृशमेव दृश्यामहे किल? ते वयं च एक-प्रकारक-वस्त्र-धारिणः किल? नैव। ते वयं च समलक्ष्यस्वप्नाः एव किल? सर्वथा नैव। भारतीयानां स्वप्नम् अस्ति यत् जीवनविकासार्थम् अपत्येभ्यः समीचिनं विद्याप्रदानम्। पाकितानीयानां स्वप्नम् अस्ति यत् काफ़िरैः सह युद्धे अपत्यानां मरणम्।भारतीयानां स्वप्नम् अस्ति यत् अग्रिमः इलोन-मस्कः वा मुकेश-अम्बानिः वा भवितुम्। पाकितानीयानां स्वप्नम् अस्ति यत् अग्रिमः हाफ़िज़-सयीदः उत वा महत्त्वाकाङ्क्षा अधिका चेत् आक्रमणकारी खालिदः।

## द्विराष्ट्र-सिद्धान्तः अतिशयतां गतः

भारतीयाः न अवगच्छन्ति यत् पाकिस्तानम् इस्लामवादि-विचारधारा-राष्ट्रम् अस्ति यत्र इतरं प्रति द्वेषः असहिष्णुता च तथाकथितः द्विराष्ट्रसिद्धान्तः इव चित्रीकृतौ। देश-जननी द्वेष-विचारधारा शासन-मार्गदर्शिका अस्ति अत्र। ध्यानास्पदम् अस्ति यत् द्विराष्ट्रसिद्धान्तः द्वयोः स्तरयोः आचर्यते। हिन्दवः महमदीयाः च सहनिवासाशक्ताः तदर्थं पाकिस्तानजननम् अभवत् - मतविषयकः सामुदायिकः द्विराष्ट्रसिद्धान्तः। पञ्चनदीयाः वङ्गीयाः च सहनिवासाशक्ताः तदर्थं बाङ्ग्लदेशजननम् अभवत् - भाषा-रङ्ग-विषयकः प्रादेशिकः द्विराष्ट्रसिद्धान्तः। अधुना पाकिस्तानीयैः पञ्चनद-महमदीयैः बलोचानां क्रियमाणे शोषणे अपि दृश्यते औपनिवेशिकः द्विराष्ट्रसिद्धान्तः। तेहीके-तालिबानेन क्रियमाणे स्वकीय-इस्लाम-प्रकारक-प्रवर्तने पञ्चनदीयाधितिष्ठिते पाकिस्ताने अपि दृश्यते - इस्लामवाद-विषयकः द्विराष्ट्रसिद्धान्तः। सुन्नि-षिय-मध्ये देवबन्दीय-बरेलवीय-मध्ये अपि दृश्यते - शाखागत-विषयकः द्विराष्ट्रसिद्धान्तः। अर्थात् द्विराष्ट्रसिद्धान्त-स्वीकर्तारः पाकिस्तान-विचारधारा-मन्यमानाः च केनापि सह शान्त्या निवासं कर्तुम् अशक्ताः।

तदर्थमेव पाकिस्तानीयाः सर्वत्र समस्योत्पादकाः विशेषतः आङ्ग्लदेशः। अरबीयानां राष्ट्राणाम् अपि पाकिस्तानीयानि कुकृत्यानि प्रति सहनशीलता नष्टीभवन् अस्ति। तथापि कोऽपि भारतीयः चिन्तयति यत् पाकिस्तानेन सह शान्तिं स्थापयितुं शक्यते, सः भ्रमे वर्तते।

## मद्यसेविनः सेनापतयः इति मिथ्याकथनम्

पाकिस्तानीयानां विषये निर्णयम् कर्तुं भारतीयानाम् अधिकांशः स्वकीयान् मिथ्याकथनानि मापकान् च निर्मितवान्। अवश्यं ते कथनानि मापकाः व्यर्थाः एव बालिशाः अपि। उदाहरणतः - कश्चन सेनानायकः मद्यसेवी अतः सः मध्यमवादी, कश्चन राजनेता त्रिवस्त्र-प्रावारक-धारी अतः सः प्रबुद्धः, कश्चन वार्ताहरः "मधुरासत्यं" कथयति, भारतं भारतीयान् प्रशंसति अतः सः मतनिरपेक्षः, कश्चन पाकिस्तानीयः पाश्चात्य-विश्वविद्यालये शिक्षितः अतः सः प्रगतिशीलः।ईदृशं नामकरणं चरित्रचित्रणं केवलम् अगाढं न, अपितु पूर्णतया बलहीन-विश्लेषण-जनकम्। पाकिस्तानीयाः अधिकम् अवगम्यते चेत् यथार्थ-स्वभावः प्रत्यक्षीभवति। ईदृशानां, प्रत्यक्ष-जिहादीयानां च मध्ये भेदः न्यूनः इति अवगम्यते। प्रत्यक्ष-जिहादीयाः तु यथार्थ-व्यवहारिणः किन्तु उभयमुखाः कृत्रिम-उदारवादिनः, मतनिरपेक्षता-मुखाच्छादधारिणः इस्लामवादिनः च तु वञ्चनां कुर्वन्ति।भाषा-माधुर्ये वा प्रबुद्ध-मध्यवादित्वे वा सत्यपि पाकिस्तानीयाः विशेषतः पञ्चनदीय-महमदीयाः नूतन-मत-परिवर्तनात् गाढ-हीन-भावना-ग्रस्ताः स्वमतावलबनं निरूपयितुम् तत्परः किन्तु कुल-वंश-भावं त्यक्तुम् अशक्ताः। ते जाटाः, गुर्जराः, अरैनाः, राजपुत्राः, शैखाः (पूर्वतनाः वैश्याः), इत्यादिनः हिन्दून् (सिखान् क्रैस्तवान् अपि) द्विषन्ति। तद्द्वेषः भारतस्योपरि विसृतः। पञ्चनदीय-महमदीयाः दुष्टतमाः विषमयतमाः द्विषतमाः विचारशून्याः पाकिस्तानीयाः। पञ्चनदीय-महमदीयाः पाकिस्तानस्य बहुसफल-विचाराधिरोपण-कार्यक्रमस्य परिणामः। तान् इतरद्वेषिणः असदृश-सह-वास-अशक्तान् "शुद्धान्" महमदीयान् कर्तुं पञ्चनदीय-महमदीयानां कुटुम्बेषु विविध-स्तरेषु सदस्येषु असत्येन वा अर्धसत्येन वा द्वेषेण वा युक्ताः विचाराः अधिरोपिताः।

ते इतरे बलोचाः पष्तुन-राष्ट्रवादिनः इत्यादिनः। केभ्यश्चित् दशकेभ्यः पूर्वं ते वङ्गीयान् द्विष्टवन्तः। किन्तु अद्य तु बाङ्ग्लदेशः इस्लामवादि-पाकिस्तानस्य प्रतिबिम्बम् अभवत् किल तदर्थं बाङ्ग्लदेशीयाः अधुना पञ्चनदीय-महमदीयानां चिरलुप्ताः भ्रातरः इव दृष्टाः।लोकतान्त्रिकान् पाकिस्तान-सेना-विरोधिनः इव स्वान् उपस्थाप्य वञ्चनां कर्तुम् उद्युतानाम् पाकिस्तानीयानां कृते भारतीयाः सरलाः लक्षाः। ईदृशाः पाकिस्तानीयाः मूढानां भारतीयानां कृते जालान् सज्जीकुर्वन्ति। ते आकर्षिताः भारतीयाः तादृशेषु पाकिस्तानीयेषु निराधारं विश्वासं कृत्वा तेभ्यः दुर्लभं प्रवेशं ददति।

## कस्यचन अफ़्घानीयस्य स्पष्टकथनम्

भारतीयैः असदृशाः अफ़्घानीयाः पाकिस्तानीयान् सम्यक् परिजानन्ति विशेषतः पञ्चनदीय-महमदीयान्। पाकिस्ताने स्थितेन पूर्वतनेन अफ़्घान-दूतेन मुल्लाह-अब्दुल-सलाम-ज़ईफ़ेन रचिते "तालिबानेन साकं मज्जीवनम्" इति पुस्तके पाकिस्तानस्य यतार्थतमं विवरणं लिखितं यत् -

पाकिस्तानस्य विश्वासघातः तावान् सुविख्यातः यत् तत् वृषभात् दुग्धं प्राप्नोतुं शक्नोति इति कथ्यते। पाकिस्तनीयाः द्विजिह्वाः, द्विमुखाः, सर्वभाषिणः। सर्वेषाम् उपयोगं कुर्वन्ति, सर्वेषां वञ्चनामपि। इस्लामीय-परमाणु-शक्ति-रूपेण इस्लाम-मत-रक्षा-व्याजेन, इस्लामीय-देशानां रक्षा-व्याजेन च अरबीयान् वञ्चयन्ति। आतङ्कवाद-विरोध-व्याजेन अमेरिकां युरोपखण्डम् अपि वञ्चयति। कश्मीर-जिहाद-व्याजेन पाकिस्तानीयान्, आविश्वम् इतरान् महमदीयान् च वञ्चयति। निगूढतया ते सर्वेषां विश्वासं घ्नन्ति। तैः इस्लामः जिहादः च स्वप्रतिवेशि-इस्लामीय-देशं काफ़िरान् च नष्टीकर्तुम् उपयुक्ताः।

## जागृहि भारत

भारतीयाः स्वभ्रान्तिनिद्रातः उत्थाय अवगच्छन्तु यत् पाकिस्तानीय-राष्ट्र-समाजयोः मध्ये अन्तरं नास्ति। केवलम् आच्छादनमेव। पाकिस्तानम् भारतस्य आमरणान्तिक-सांस्कृतिक-शत्रुः इति विषयम् अनङ्गीकुर्वद्भिः भारतीयैः अन्तरं प्रसारितम्। पाकिस्तानस्य अस्तित्वस्य आधारौ भारत-विरोधः, हिन्दुत्व-विरोधः च। पाकिस्तानेन सह मित्रता केवलं सर्वथा मौर्ख्यम्।पाकिस्तानेन सह विचार-विमर्शात् विवादसमाप्तिः, शान्ति-स्थापना शक्येते इति विश्वासः भारतीयैः नीतिनिर्मातृभिः त्यक्तव्यः। कस्यचन सेनाध्यक्षस्य नीतिः इतरेण त्यक्तः।

✍ईधरधीरजः, हैदराबादः